ग्रामेण ग्राम्येण भोग्यद्रव्येण आयुर्नयति यापयतीति । ग्रामान् भोग्यवस्तूनि नयति आत्मानं प्रापयतीति वा ।) भोगिकः । इति हेमचन्द्रः ॥

ग्रामणीः, स्त्री, (ग्रामेण जनसमूहेनेत्यर्थः नीयते गृह्यते यद्वा ग्रामेण ग्राम्यधर्म्मेण केवलं मैथुनादिना नयति कालं यापयतीति । नी + क्विप् ।) वेश्या । ग्रामेया । नीलिका । इति हेमचन्द्रः ॥

ग्रामतक्षः, पुं, (ग्रामस्थः ग्रामपरतन्त्रो वा तक्षा । "ग्रामकौटाभ्यां च तक्ष्णः ।" ५ । ४ । ९५ । इति टच् ।) ग्रामाधीनः काष्ठतट् । ग्रामायत्तस्तक्षा । इत्यमरः । २ । १० । ६ ॥ गेँये कुतार इति भाषा ॥

ग्रामता, स्त्री, (ग्रामाणां समूहः । "ग्रामजनबन्धुभ्यस्तल् ।" ४ । २ । ४३ । इति तल् ।) ग्रामसमूहः । इत्यमरः । ३ । २ । ४३ ॥ (ग्रामस्य भावः । "तस्य भावस्त्वतलौ ।" ५।१।११९ । इति तल् ।) ग्रामत्वञ्च ॥

ग्रामभृतः, पुं, (ग्रामे ग्रामस्य वा भृतः भरणीयः ग्रामावस्थितजनैरिति शेषः ।) ग्रामप्रेष्यः । स तु ब्राह्मणश्चेत् पञ्चमोऽब्राह्मणः । इत्याह्निकतत्त्वम् ॥ (यथाह शातातपः ।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना ।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः ।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम् ।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥")

ग्राममद्गुरिका, स्त्री, (ग्रामस्य मत्स्यग्रामेषु वा मद्गुरिकेव । क्षुद्रमद्गुर इवेत्यर्थः ।) शृङ्गीमत्स्यः । ग्रामयुद्धम् । इति मेदिनी । के । २३४ ॥

ग्राममुखः, पुं, (ग्रामस्य मुखमिव यो स्थितः । यद्वा, ग्रामो ग्रामवासिजनो मुखत्वेन प्रधानकारणत्वेन यस्य । ग्रामस्थजनसाध्यत्वादेवास्य तथात्वम् ।) हट्टः । इति शब्दरत्नावली ॥

ग्राममृगः, पुं, (ग्रामस्य मृग इव । यद्वा, ग्रामे स्थितो मृगः पशुः ।) कुक्कुरः । इति शब्दरत्नावली ॥

ग्रामयाजकः, पुं, (ग्रामस्य याजको यागकर्त्ता ।) ग्रामस्थनानावर्णानां पुरोहितः । स तु चतुर्थोऽब्राह्मणः । यथाह, शातातपः ।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना ।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः ।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम् ।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥"

(एतस्मै प्रदत्तं दानादिकं निष्फलं भवति । यथोक्तं महाभारते । ३ । १९९ । ७ ।

"यथैव पतितं दानं ब्राह्मणे तस्करे तथा ।
गुरौ चानृतिके पापे कृतघ्ने ग्रामयाजके ॥")

ग्रामस्थः, त्रि, ग्रामवासी । ग्रामे तिष्ठति य इत्यर्थे कप्रत्यय ॥

ग्रामहासकः, पुं, (ग्रामान् ग्रामवासिनः श्वशुरालयस्थसमूहान् वा हासयतीति । हस् + णिच् + ण्वुल् ।) भगिनीपतिः । इति शब्दरत्नावली ॥

ग्रामाधानं, क्ली, (आधीयते उपजीविका यत्र तत् । आ + धा + ल्युट् । ततो ग्रामस्य मृगयुसमूहस्य आधानं पोषणकम् ।) मृगया । इति हलायुधः ॥

ग्रामान्तं, क्ली, (ग्रामस्य अन्तं समीपम् ।) ग्रामसमीपम् । तत्पर्य्यायः । उपशल्यम् २ । इत्यमरः । २ । ३ । २० ॥ ग्रामान्तिकम् ३ । इति बोपालितः ॥

ग्रामिणी, स्त्री, (ग्राम उत्पत्तिस्थानत्वेन अस्ति अस्याः । अत इनिः स्त्रियां ङीप् ।) नीलीवृक्षः । इति जटाधरः ॥

ग्रामी, [न्] त्रि, (ग्रामः अधिकारित्वेनास्त्यस्य । अत इनिः ।) ग्रामविशिष्टः । गाँइ इति भाषा ॥ यथा, ब्राह्मणकुलाचार्य्यकारिकायाम् ।

"रामो गड़गड़ग्रामी शिषः केशरकोणितः ।
केशरकोणीति ख्यातो ग्रामी ग्रामवताम्बरः ॥"

(ग्रामो ग्राम्यधर्म्मो मैथुनं अस्त्यस्येति । ग्राम्यधर्म्मविशिष्टः । यथा, भागवते । ४ । २९ । १४ ।

"आसुरी मेढ्रमर्वाग्द्वार्य्यवायो ग्रामिणां रतिः ।
उपस्थो दुर्मदः प्रोक्तो निरृतिर्गुद उच्यते ॥")

ग्रामीणः, पुं, (ग्रामे भवः । ग्राम + "ग्रामाद्यखञौ ।" ४ । २ । ९४ । इति खञ् ।) ग्राम्यशूकरः । इति राजनिर्घण्टः ॥ कुक्कुरः । काकः । ग्रामोत्पन्ने त्रि । इति मेदिनी । णे । ४६ ॥ (यथा, भाषापरिच्छेदे । ७९ ।

"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥")

ग्रामीणा, स्त्री, (ग्रामीण + स्त्रियां टाप् ।) नीलीवृक्षः । इति मेदिनी ॥(अस्याः पर्य्याया यथा,

"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणास्तस्या नीलिनीशब्दे ज्ञातव्याः ॥) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

ग्रामेयकः, त्रि,(ग्रामे भवः । ग्राम + "कत्त्र्यादिभ्यो ढकञ् ।" ४।२।९५ । इति ढकञ् ।) ग्राम्यः । इति हेमचन्द्रः । ३ । १६५ ॥

ग्रामेया, स्त्री, (ग्रामे भवा । ग्राम + ढक् ।) ग्राम्यनारी । इति ग्रामणीशब्दार्थे हेमचन्द्रः ॥

ग्रामेशः, त्रि (ग्रामस्य ईशः ।) ग्रामेश्वरः । ग्रामाधिपतिः । यथा, शान्तिशतके । ११ ।

"यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं ।
सेवायै मृगयामहे नरमहो मूढ़ा वराका वयम् ॥"

ग्राम्यः, त्रि, (ग्रामे भवः । ग्राम + "ग्रामात् यखञौ ।" ४ । २ । ९४ । इति यः ।) ग्रामोत्पन्नः । तत्पर्य्यायः । ग्रामेयकः २ ग्रामीणः ३ । इति हेमचन्द्रः । ३ । १६५ ॥ (यथा, मनुः । ११ । १९९ ।

"श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च ।"

तथा, माघे । १२ । ३८ ।

"ग्राम्यानपश्यत् कपिशं पिपासतः ॥"

मूढः । प्राकृतः । यथा, तत्रैव । १४ । ६४ ।

"ग्राम्यभावमपहातुमिच्छवो
योगमार्गपतितेन चेतसा ॥")

भण्डादिवचनम् । "हालिकशाकटिकप्रधानत्वात् ग्रामे भवं ग्राम्यम् ।" इति भरतः ॥ तत्पर्य्यायः । अश्लीलम् २ । इत्यमरः । १।६।१९ ॥ (काव्यस्य दोषविशेषः । स च शब्दगतः अर्थगतश्च । तत्र शब्दगतो यथा, साहित्यदर्पणे । ७ । ३ ।

"दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः ।
ग्राम्याऽप्रतीतसन्दिग्धनेयार्थनिहतार्थताः ॥"

अस्य उदाहरणं यथा तत्रैव । "कटिस्ते हरते मनः । अत्र कटिशब्दो ग्राम्यः ॥" अर्थगतो यथा, तत्रैव । ७ । ५ ।

"अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः ॥"

उदाहरणं यथा तत्रैव । "स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय ! ॥ अत्रार्थो ग्राम्यः ॥")

ग्राम्यकन्दः, पुं, (ग्राम्यो ग्रामभवः कन्दः ।) ग्राम्योलः । बनओल इति भाषा । तत्पर्य्यायः । स्थूलकन्दः २ । इति रत्नमाला ॥ स तु दोषलः । इति राजवल्लभः ॥

ग्राम्यकर्कटी, स्त्री, (ग्राम्या ग्रामजाता कर्कटी ।) कुष्माण्डः । इति त्रिकाण्डशेषः ॥

ग्राम्यकुङ्कुमं, क्ली, (ग्राम्यं ग्रामसम्भूतं कुङ्कुमम् ।) कुसुम्भम् । इति त्रिकाण्डशेषः ॥

ग्राम्यधर्म्मः, पुं, (ग्राम्यस्य इतरादेर्धर्म्मः ।) मैथुनम् । इत्यमरः । २ । ७ । ५७ ॥ (यथा, महाभारते । ३ । ४८ । ४ ।

"प्रमत्तो ग्राम्यधर्म्मेषु मन्दात्मा पापनिश्चयः ।
मम पुत्त्रः सुदुर्बुद्धिः पृथिवीं घातयिष्यति ॥")

ग्राम्यपशुः, पुं, (ग्राम्यो ग्रामजातः पशुः ।) ग्रामजातजन्तुः । (यथा, भागवते । ६ । १५ । १६ ।

"तस्माद् युवां ग्राम्यपशोर्मम मूढ़धियः प्रभू ।
अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्य्यताम् ॥")

स तु सप्तविधो यथा । गौः १ अजः २ मेषः ३ मनुष्यः ४ अश्वः ५ अश्वतरः ६ गर्द्दभः ७ । इति तिथ्यादितत्त्वम् ॥ (यथाह पैठीनसिः ।

"ग्राम्यारण्याश्चतुर्द्दश । गौरविरजोऽश्वोऽश्वतरो गर्द्दभो मनुष्यश्चेति ग्राम्याः पशवः । महिषवानर-ऋक्षसरीसृपरुरुपृषन्मृगाश्चेति सप्तारण्याः ॥" सुश्रुतमते उष्ट्रादयोऽपि ग्राम्याः । यदुक्तं तत्रैव सूत्रस्थाने ४६ अध्याये ।

"अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः ॥")

ग्राम्यमद्गुरिका, स्त्री, (ग्राम्या ग्रामोद्भवा मद्गुरिका) शृङ्गीमत्स्यः । इति हारावली ॥

ग्राम्यमृगः, पुं, (ग्राम्यो ग्रामभवो मृगो हरिणइव । मृगःपशुर्वा इत्येके ।) कुक्कुरः । इति जटाधरः ॥

ग्राम्यराशिः, पुं, (ग्राम्यो राशिः ।) मिथुनम् । कन्या । तुला । वृश्चिकः । धनुः । कुम्भः । रात्रा मेषः वृषश्च । इति ज्योतिषम् ॥